# Sri Ganesha Kavacha

# શ્રીગણેશકવચમ્

## Document Information

Text title : gaNeshakavacham

File name : ganeshakavach.itx

Category : kavacha, ganesha, gaNeshapurANa

Location : doc_ganesha

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : shrIgaNeshapurANaM krIDA (uttara)khaNDaH | adhyAyaH 85 | 2.85 18-42||

Latest update : December 11, 2003

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 18, 2024

*sanskritdocuments.org*

# શ્રીગણેશકવચમ્

શ્રીગણેશાય નમઃ ॥

ગૌર્યુવાચ ।
એષોઽતિચપલો દૈત્યાન્બાલ્યેઽપિ નાશયત્યહો । (બાલો દૈત્યાન્હન્તિ બહૂનપિ)
અગ્રે કિં કર્મ કર્તેતિ ન જાને મુનિસત્તમ ॥ ૧॥

દૈત્યા નાનાવિધા દુષ્ટાઃ સાધુદેવદ્રુહઃ ખલાઃ ।
અતોઽસ્ય કણ્ઠે કિઞ્ચિત્ત્વં રક્ષાર્થં બદ્ધુમર્હસિ ॥ ૨॥

મુનિરુવાચ ।
ધ્યાયેત્સિંહહતં વિનાયકમમું દિગ્બાહુમાદ્યે યુગે
ત્રેતાયાં તુ મયૂરવાહનમમું ષડ્બાહુકં સિદ્ધિદમ્ ।
દ્વાપારે તુ ગજાનનં યુગભુજં રક્તાઙ્ગરાગં વિભુમ્
તુર્યે તુ દ્વિભુજં સિતાઙ્ગરુચિરં સર્વાર્થદં સર્વદા ॥ ૩॥

વિનાયકઃ શિખાં પાતુ પરમાત્મા પરાત્પરઃ ।
અતિસુન્દરકાયસ્તુ મસ્તકં સુમહોત્કટઃ ॥ ૪॥

લલાટં કશ્યપઃ પાતુ ભ્રૂયુગં તુ મહોદરઃ ।
નયને ભાલચન્દ્રસ્તુ ગજાસ્યસ્ત્વોષ્ઠપલ્લવૌ ॥ ૫॥

જિહ્વાં પાતુ ગણક્રીડશ્ચિબુકં ગિરિજાસુતઃ ।
વાચં વિનાયકઃ પાતુ દન્તાન્ રક્ષતુ વિઘ્નહા ॥ ૬॥

શ્રવણૌ પાશપાણિસ્તુ નાસિકાં ચિન્તિતાર્થદઃ ।
ગણેશસ્તુ મુખં કણ્ઠં પાતુ દેવો ગણઞ્જયઃ ॥ ૭॥

સ્કન્ધૌ પાતુ ગજસ્કન્ધઃ સ્તનૌ વિઘ્નવિનાશનઃ ।
હૃદયં ગણનાથસ્તુ હેરંબો જઠરં મહાન્ ॥ ૮॥

ધરાધરઃ પાતુ પાર્શ્વૌ પૃષ્ઠં વિઘ્નહરઃ શુભઃ ।

લિઙ્ગં ગુહ્યં સદા પાતુ વક્રતુણ્ડો મહાબલઃ ॥ ૯॥

ગણક્રીડો જાનુસઙ્ઘે ઊરુ મઙ્ગલમૂર્તિમાન્ ।
એકદન્તો મહાબુદ્ધિઃ પાદૌ ગુલ્ફૌ સદાઽવતુ ॥ ૧૦॥

ક્ષિપ્રપ્રસાદનો બાહૂ પાણી આશાપ્રપૂરકઃ ।
અઙ્ગુલીશ્ચ નખાન્પાતુ પદ્મહસ્તોઽરિનાશનઃ ॥ ૧૧॥

સર્વાઙ્ગાનિ મયૂરેશો વિશ્વવ્યાપી સદાઽવતુ ।
અનુક્તમપિ યત્સ્થાનં ધૂમ્રકેતુઃ સદાઽવતુ ॥ ૧૨॥

આમોદસ્ત્વગ્રતઃ પાતુ પ્રમોદઃ પૃષ્ઠતોઽવતુ ।
પ્રાચ્યાં રક્ષતુ બુદ્ધીશ આગ્નેયાં સિદ્ધિદાયકઃ ॥૧૩॥

દક્ષિણાસ્યામુમાપુત્રો નૈરૃત્યાં તુ ગણેશ્વરઃ ।
પ્રતીચ્યાં વિઘ્નહર્તાઽવ્યાદ્વાયવ્યાં ગજકર્ણકઃ ॥ ૧૪॥

કૌબેર્યાં નિધિપઃ પાયાદીશાન્યામીશનન્દનઃ ।
દિવાઽવ્યાદેકદન્તસ્તુ રાત્રૌ સન્ધ્યાસુ વિઘ્નહૃત્ ॥ ૧૫॥

રાક્ષસાસુરવેતાલગ્રહભૂતપિશાચતઃ ।
પાશાઙ્કુશધરઃ પાતુ રજઃસત્ત્વતમઃ સ્મૃતિઃ ॥ ૧૬॥

જ્ઞાનં ધર્મં ચ લક્ષ્મીં ચ લજ્જાં કીર્તિં તથા કુલમ્ ।
વપુર્ધનં ચ ધાન્યં ચ ગૃહાન્દારાન્સુતાન્સખીન્ ॥ ૧૭॥

સર્વાયુધધરઃ પૌત્રાન્ મયૂરેશોઽવતાત્સદા ।
કપિલોઽજાદિકં પાતુ ગજાશ્વાન્વિકટોઽવતુ ॥ ૧૮॥

ભૂર્જપત્રે લિખિત્વેદં યઃ કણ્ઠે ધારયેત્સુધીઃ ।
ન ભયં જાયતે તસ્ય  યક્ષરક્ષઃપિશાચતઃ ॥ ૧૮॥

ત્રિસન્ધ્યં જપતે યસ્તુ વજ્રસારતનુર્ભવેત્ ।
યાત્રાકાલે પઠેદ્યસ્તુ નિર્વિઘ્નેન ફલં લભેત્ ॥ ૨૦॥

યુદ્ધકાલે પઠેદ્યસ્તુ વિજયં ચાપ્નુયાદ્દ્રુતમ્ ।
મારણોચ્ચાટકાકર્ષસ્તમ્ભમોહનકર્મણિ ॥ ૨૧॥

સપ્તવારં જપેદેતદ્દિનાનામેકવિંશતિમ્ ।
તત્તત્ફલવાપ્નોતિ સાધકો નાત્રસંશયઃ ॥૨૨॥

એકવિંશતિવારં ચ પઠેત્તાવદ્દિનાનિ યઃ ।
કારાગૃહગતં સદ્યોરાજ્ઞા વધ્યં ચ મોચયેત્ ॥ ૨૩॥

રાજદર્શનવેલાયાં પઠેદેતત્ત્રિવારતઃ ।
સ રાજસં વશં નીત્વા પ્રકૃતીશ્ચ સભાં જયેત્ ॥ ૨૪॥

ઇદં ગણેશકવચં કશ્યપેન સમીરિતમ્ ।
મુદ્ગલાય ચ તે નાથ માણ્ડવ્યાય મહર્ષયે ॥ ૨૫॥

મહ્યં સ પ્રાહ કૃપયા કવચં સર્વસિદ્ધિદમ્ ।
ન દેયં ભક્તિહીનાય દેયં શ્રદ્ધાવતે શુભમ્ ॥ ૨૬॥

(યસ્યાનેન કૃતા રક્ષા ન બાધાસ્ય ભવેત્ક્વચિત્ ।
રાક્ષસાસુરવેતાલદૈત્યદાનવસમ્ભવા ॥ ૨૭॥)

ઇતિ શ્રીગણેશપુરાણે ઉત્તરખણ્ડે પઞ્ચાશીતિતમોઽધ્યાયયે
ગણેશકવચં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીગણેશપુરાણં ક્રીડા (ઉત્તર)ખણ્ડઃ । અધ્યાયઃ ૮૫ । ૨.૮૫ ૧૮-૪૨॥

- .. shrIgaNeshapurANaM krIDA (uttara)khaNDaH . adhyAyaH 85 . 2.85 18-42..

Encoded by Sunder Hattangadi

---

*Sri Ganesha Kavacha*

pdf was typeset on April 18, 2024

Please send corrections to *sanskrit@cheerful.com*